# M.A. 3rd Semester Examination, 2023

## SANSKRIT

PAPER – SAN-302(A, B & C)

*Full Marks* : 50

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

## GROUP—A

( *Literature* )

सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः

1. यथानिर्देशमुत्तरं दीयताम् — 10×2

(क) भवभूतिना प्रणीतस्य 'उत्तररामचरितम्' इति नाटकस्य प्रथमाङ्के उपस्थापितस्य चित्रदर्शनस्य नाटकीयतात्पर्य-मालोच्यताम् ।

*अथवा*

भवभूतिप्रणीतस्य 'उत्तररामचरितम्' इति नाटकस्य द्वितीयाङ्कस्यादौ उपस्थापितस्य विष्कम्भकांशस्य नाटकीयतात्पर्यं विचार्यताम् ।

(*ख*) का नाम प्रस्तावना ? 'रत्नावली'— इति नाटिकायाः प्रस्तावना प्रस्तावनाभेदेषु कीदृशी ? सा यथार्था न वेति विचार्यताम् ।

*अथवा*

रत्नावल्याः नायिका का ? तस्याः चारित्रिकं वैशिष्ट्यं यत् प्रतिफलितं नाटिकायां तत् उपवर्ण्यताम् ।

**2.** यथानिर्देशमुत्तरं दीयताम्— $5 \times 2$

(क) कयोश्चिद् द्वयोर्व्याख्या कार्या—

(*i*) लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुवर्तते ।

(*ii*) क्लिष्टो जनः किल जनैरनुरञ्जनीय-
स्तन्नो यदुक्तमशुभं च न तत्क्षमं ते ।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडनानि ।।

(*iii*) अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करूणो रसः ।।

(*ख*) कयोश्चिद् द्वयोर्व्याख्या कार्या — 5 × 2

(*i*) द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ।।

(*ii*) अस्मिन् प्रकीर्णपटवासकृतान्धकारे
दृष्टो मनाङ्मणिविभूषणरश्मिजालैः ।
पातालमुद्यतफणाकृतिशृङ्गकोयं
मामद्य संस्मरयतीव भुजङ्गलोकः ।।

(*iii*) दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा ।
प्रियसखि विषमं प्रेम मरणं शरणं नु वरमेकम् ।।

**[ Internal Assessment — 10 Marks ]**

## GROUP—B

( *Pāṇinian Grammar* )

सर्वे प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः

1. प्रश्नद्वयं समाधेयम् — 10×2

(क) कारकस्वरूपं महाभाष्यदिशा सोदाहरणमालोच्यताम्

*अथवा*

सम्प्रदानसंज्ञाविधायकं प्रधानं पाणिनीयं सूत्रं प्रतिपदव्यावृत्तिपुरःसरं सोदाहरणं व्याख्यायताम् ।

(ख) वृत्तिग्रन्थरूपेण काशिकायाः परिचयः प्रदेयः ।

*अथवा*

वर्णानामुपदेशः किमर्थं क्रियते ? काशिकां न्यासमाश्रित्य च आलोच्यताम् ।

**2.** यथेच्छं द्वयोर्व्याख्या कार्या — 5 × 2

(क) अपादानादीनां त्वप्रसिद्धिः ।

(ख) साधकतमं करणम् ।

(ग) न वा, अध्रौव्यस्याविवक्षितत्वात् ।

**3.** द्वयोर्व्याख्या कार्या — 5 × 2

(क) अथ शब्दानुशासनम् ।

(ख) ल ण्

(ग) क प य्

**[ Internal Assessment – 10 Marks ]**

## GROUP–C

*(Indian Philosophy)*

**सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः**

**1.** प्रमाणस्य प्रामाण्यकल्पे भाष्यकारेण कीदृशं प्रमाणं स्वीकृतम् ? भाष्यकारेण प्रमाणस्य प्रामाण्यं कथं प्रतिस्थापितं सयुक्ति प्रतिपाद्यताम् । 10

*अथवा*

प्रतिपदव्यावृत्तिपूर्वकं प्रत्यक्षलक्षणं निरूप्यताम् ।

2. द्वयोर्व्याख्या कार्या — 5×2

(क) "तत्र वादजल्पौ सप्रयोजनौ, वितण्डा तु परीक्ष्यते" ।

(ख) "स द्विविधो दृष्टादृष्टार्थत्वात्" ।

(ग) "तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ।

3. व्याप्तेः प्रथमलक्षणस्य अव्याप्ति–अतिव्याप्त्या–दिस्थलानि समुत्थाप्य यथाशास्त्रं समाधीयन्ताम् । 10

*अथवा*

"इदं ज्ञेयं वाच्यत्वात्" इति, "सत्तावान् जातेः" इत्यादिषु स्थलेषु व्याप्तेः सिद्धान्तलक्षणसमन्वयः प्रदर्श्यताम् ।

4. द्वयोर्व्याख्या कार्या — 5×2

(क) ज्ञायमानं लिङ्गन्तु करणं नहि ।

(ख) व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ।

(ग) येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यावृत्तित्वं बोध्यम् ।

**[ Internal Assessment — 10 Marks ]**

———